# shrIRamatapini Upanishad

# શ્રીરામતાપિન્યુપનિષત્

## Document Information

Text title : Ramatapini Upanishad

File name : ramatapini.itx

Category : upanishhat, svara, raama

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 55 / 108; Atharva Veda - Vaishnava upanishad

Latest update : June 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીરામતાપિન્યુપનિષત્

શ્રીરામતાપનીયાર્થં ભક્તધ્યેયકલેવરમ્ ।
વિકલેવરકૈવલ્યં શ્રીરામબ્રહ્મ મે ગતિઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ચિન્મયેઽસ્મિન્મહાવિષ્ણૌ જાતે દશરથે હરૌ ।
રઘોઃ કુલેઽખિલં રાતિ રાજતે યો મહીસ્થિતઃ ॥ ૧॥

સ રામ ઇતિ લોકેષુ વિદ્વદ્ભિઃ પ્રકટીકૃતઃ ।
રાક્ષસા યેન મરણં યાન્તિ સ્વોદ્રેકતોઽથવા ॥ ૨॥

રામનામ ભુવિ ખ્યાતમભિરામેણ વા પુનઃ ।
રાક્ષસાન્મર્ત્યરૂપેણ રાહુર્મનસિજં યથા ॥ ૩॥

પ્રભાહીનાંસ્તથા કૃત્વા રાજ્યાર્હાણાં મહીભૃતામ્ ।
ધર્મમાર્ગં ચરિત્રેણ જ્ઞાનમાર્ગં ચ નામતઃ ॥ ૪॥

તથા ધ્યાનેન વૈરાગ્યમૈશ્વર્યં સ્વસ્ય પૂજનાત્ ।
તથા રાત્યસ્ય રામાખ્યા ભુવિ સ્યાદથ તત્ત્વતઃ ॥ ૫॥

રમન્તે યોગિનોઽનન્તે નિત્યાનન્દે ચિદાત્મનિ ।
ઇતિ રામપદેનાસૌ પરં બ્રહ્માભિધીયતે ॥ ૬॥

ચિન્મયસ્યાદ્વિતીયસ્ય નિષ્કલસ્યાશરીરિણઃ ।
ઉપાસકાનાં કાર્યાર્થં બ્રહ્મણો રૂપકલ્પના ॥ ૭॥

રૂપસ્થાનાં દેવતાનાં પુંસ્ત્ર્યઙ્ગાસ્ત્રાદિકલ્પના ।

દ્વિત્તત્વારિષડષ્ટાનાં દશ દ્વાદશ ષોડશ ॥ ૮॥

અષ્ટાદશામી કથિતા હસ્તાઃ શઙ્ખાદિભિર્યુતાઃ ।
સહસ્રાન્તાસ્તથા તાસાં વર્ણવાહનકલ્પના ॥ ૯॥

શક્તિસેનાકલ્પના ચ બ્રહ્મણ્યેવં હિ પઞ્ચધા ।
કલ્પિતસ્ય શરીરસ્ય તસ્ય સેનાદિકલ્પના ॥ ૧૦॥

બ્રહ્માદીનાં વાચકોઽયં મન્ત્રોઽન્વર્થાદિસંજ્ઞકઃ ।
જપ્તવ્યો મન્ત્રિણા નૈવં વિના દેવઃ પ્રસીદતિ ॥ ૧૧॥

ક્રિયાકર્મેજ્યકર્તૄણામર્થં મન્ત્રો વદત્યથ ।
મનનાત્ત્રાણનાન્મન્ત્રઃ સર્વવાચ્યસ્ય વાચકઃ ॥ ૧૨॥

સોઽભયસ્યાસ્ય દેવસ્ય વિગ્રહો યન્ત્રકલ્પના ।
વિના યન્ત્રેણ ચેત્પૂજા દેવતા ન પ્રસીદતિ ॥ ૧૩॥

ઇતિ રામપૂર્વતાપિન્યુપનિષદિ પ્રથમોપનિષત્ ॥ ૧॥

સ્વર્ભૂર્જ્યોતિર્મયોઽનન્તરૂપી સ્વેનૈવ ભાસતે ।
જીવત્વેન સમો યસ્ય સૃષ્ટિસ્થિતિલયસ્ય ચ ॥ ૧॥

કારણત્વેન ચિચ્છક્ત્યા રજઃસત્ત્વતમોગુણૈઃ ।
યથૈવ વટબીજસ્થઃ પ્રાકૃતશ્ચ મહાન્દ્રુમઃ ॥ ૨॥

તથૈવ રામબીજસ્થં જગદેતચ્ચરાચરમ્ ।
રેફારૂઢા મૂર્તયઃ સ્યુઃ શક્તયસ્તિસ્ર એવ ચેતિ ॥ ૩॥

ઇતિ રામતાપિન્યુઓઅનિષદિ દ્વિતીયોપનિષત્ ॥ ૨॥

સીતારામૌ તન્મયાવત્ર પૂજ્યૌ
    જાતાન્યાભ્યાં ભુવનાનિ દ્વિસપ્ત ।
સ્થિતાનિ ચ પ્રહિતાન્યેવ તેષુ
    તતો રામો માનવો માયયાધાત્ ॥ ૧॥

જગત્પ્રાણાયાત્મનેઽસ્મૈ નમઃ સ્યા-
    ન્નમસ્ત્વૈક્યં પ્રવદેત્પ્રાગ્ગુણેનેતિ ॥ ૨॥

ઇતિ રામતાપિન્યુપનિષદિ તૃતીયોપનિષત્ ॥ ૩॥

જીવવાચી નમો નામ ચાત્મારામેતિ ગીયતે ।

તદાત્મિકા યા ચતુર્થી તથા માયેતિ ગીયતે ॥ ૧॥

મન્ત્રોયં વાચકો રામો રામો વાચ્યઃ સ્યાદ્યોગએતયોઃ ।
ફલતશ્ચૈવ સર્વેષાં સાધકાનાં ન સંશયઃ ॥ ૨॥

યથા નામી વાચકેન નામ્ના યોઽભિમુખો ભવેત્ ।
તથા બીજાત્મકો મન્ત્રો મન્ત્રિણોઽભિમુખો ભવેત્ ॥ ૩॥

બીજશક્તિં ન્યસેદ્દક્ષવામયોઃ સ્તનયોરપિ ।
કીલો મધ્યે વિના ભાવ્યઃ સ્વવાઞ્છાવિનિયોગવાન્ ॥ ૪॥

સર્વેષામેવ મન્ત્રાણામેષ સાધારણઃ ક્રમઃ ।
અત્ર રામોઽનન્તરૂપસ્તેજસા વહ્નિના સમઃ ॥ ૫॥

સત્ત્વનુષ્ણગુવિશ્વશ્ચેદગ્નીષોમાત્મકં જગત્ ।
ઉત્પન્નઃ સીતયા ભાતિ ચન્દ્રશ્ચન્દ્રિકયા યથા ॥ ૬॥

પ્રકૃત્યા સહિતઃ શ્યામઃ પીતવાસા જટાધરઃ ।
દ્વિભુજઃ કુણ્ડલી રત્નમાલી ધીરો ધનુર્ધરઃ ॥ ૭॥

પ્રસન્નવદનો જેતા ધૃષ્ટ્યષ્ટકવિભૂષિતઃ ।
પ્રકૃત્યા પરમેશ્વર્યા જગદ્યોન્યાઙ્કિતાઙ્ગભૃત્ ॥ ૮॥

હેમાભયા દ્વિભુજયા સર્વાલઙ્કૃતયા ચિતા ।
શ્લિષ્ટઃ કમલધારિણ્યા પુષ્ટઃ કોસલજાત્મજઃ ॥ ૯॥

દક્ષિણે લક્ષ્મણેનાથ સધનુષ્પાણિના પુનઃ ।
હેમાભેનાનુજેનૈવ તથા કોણત્રયં ભવેત્ ॥ ૧૦॥

તથૈવ તસ્ય મન્ત્રસ્ય યસ્યાણુશ્ચ સ્વઙેન્તયા ।
એવં ત્રિકોણરૂપં સ્યાત્તં દેવા યે સમાયયુઃ ॥ ૧૧॥

સ્તુતિં ચક્રુશ્ચ જગતઃ પતિં કલ્પતરૌ સ્થિતમ્ ।
કામરૂપાય રામાય નમો માયામયાય ચ ॥ ૧૨॥

નમો વેદાદિરૂપાય ઓઙ્કારાય નમો નમઃ ।
રમાધરાય રામાય શ્રીરામાયાત્મમૂર્તયે ॥ ૧૩॥

જાનકીદેહભૂષાય રક્ષોઘ્નાય શુભાઙ્ગિને ।
ભદ્રાય રઘુવીરાય દશાસ્યાન્તકરૂપિણે ॥ ૧૪॥

રામભદ્ર મહેશ્વાસ રઘુવીર નૃપોત્તમ ।
ભો દશાસ્યાન્તકાસ્માકં રક્ષાં દેહિ શ્રિયં ચ તે ॥ ૧૫॥

ત્વમૈશ્વર્યં દાપયાથ સમ્પ્રત્યાશ્વરિમારણમ્ ।
કુર્વિતિ સ્તુત્ય દેવાદ્યાસ્તેન સાર્ધં સુખં સ્થિતાઃ ॥ ૧૬॥

સ્તુવન્ત્યેવં હિ ઋષયસ્તદા રાવણ આસુરઃ ।
રામપત્નીં વનસ્થાં યઃ સ્વનિવૃત્ત્યર્થમાદદે ॥ ૧૭॥

સ રાવણ ઇતિ ખ્યાતો યદ્વા રાવાચ્ચ રાવણઃ ।
તદ્વ્યાજેનેક્ષિતું સીતાં રામો લક્ષ્મણ એવ ચ ॥ ૧૮॥

વિચેરતુસ્તદા ભૂમૌ દેવીં સંદૃશ્ય ચાસુરમ્ ।
હત્વા કબન્ધં શબરીં ગત્વા તસ્યાજ્ઞયા તયા ॥ ૧૯॥

પૂજિતો વાયુપુત્રેણ ભક્તેન ચ કપીશ્વરમ્ ।
આહૂય શંસતાં સર્વમાદ્યન્તં રામલક્ષ્મણૌ ॥ ૨૦॥

સ તુ રામે શઙ્કિતઃ સન્પ્રત્યયાર્થં ચ દુન્દુભેઃ ।
વિગ્રહં દર્શયામાસ યો રામસ્તમચિક્ષિપત્ ॥ ૨૧॥

સપ્ત સાલાન્વિભિદ્યાશુ મોદતે રાઘવસ્તદા ।
તેન હૃષ્ટઃ કપીન્દ્રોઽસૌ સ રામસ્તસ્ય પત્તનમ્ ॥ ૨૨॥

જગામાગર્જદનુજો વાલિનો વેગતો ગૃહાત્ ।
તદા વાલી નિર્જગામ તં વાલિનમથાહવે ॥ ૨૩॥

નિહત્ય રાઘવો રાજ્યે સુગ્રીવં સ્થાપયત્તતઃ ।
હરીનાહૂય સુગ્રીવસ્ત્વાહ ચાશાવિદોઽધુના ॥ ૨૪॥

આદાય મૈથિલીમદ્ય દદતાશ્વાશુ ગચ્છત ।
તતસ્તતાર હનુમાનબ્ધિં લઙ્કાં સમાયયૌ ॥ ૨૫॥

સીતાં દૃષ્ટ્વાઽસુરાન્હત્વા પુરં દગ્ધ્વા તથા સ્વયમ્ ।
આગત્ય રામેણ સહ ન્યવેદયત તત્ત્વતઃ ॥ ૨૬॥

તદા રામઃ ક્રોધરૂપી તાનાહૂયાથ વાનરાન્ ।
તૈઃ સાર્ધમાદાયાસ્ત્રાણિ પુરીં લઙ્કાં સમાયયૌ ॥ ૨૭॥

તાં દૃષ્ટ્વા ઉદધીશેન સાર્ધં યુદ્ધમકારયત્ ।
ઘટશ્રોત્રસહસ્રાક્ષજિદ્ભ્યાં યુક્તં તમાહવે ॥ ૨૮॥

હત્વા બિભીષણં તત્ર સ્થાપ્યાથ જનકાત્મજામ્ ।
આદાયાઙ્કસ્થિતાં કૃત્વા સ્વપુરં તૈર્જગામ સઃ ॥ ૨૯॥

તતઃ સિંહાસનસ્થઃ સન્ દ્વિભુજો રઘુનન્દનઃ ।
ધનુર્ધરઃ પ્રસન્નાત્મા સર્વાભરણભૂષિતઃ ॥ ૩૦॥

મુદ્રાં જ્ઞાનમયીં યામ્યે વામે તેજપ્રકાશિનીમ્ ।
ધૃત્વા વ્યાખ્યાનનિરતશ્ચિન્મયઃ પરમેશ્વરઃ ॥ ૩૧॥

ઉદગ્દક્ષિણયોઃ સ્વસ્ય શત્રુઘ્નભરતૌ તતઃ ।
હનૂમન્તં ચ શ્રોતારમગ્રતઃ સ્યાત્રિકોણગમ્ ॥ ૩૨॥

ભરતાધસ્તુ સુગ્રીવં શત્રુઘ્નાધો બિભીષણમ્ ।
પશ્ચિમે લક્ષ્મણં તસ્ય ધૃતચ્છત્રં સચામરમ્ ॥ ૩૩॥

તદધસ્તૌ તાલવૃન્તકરૌ ત્ર્યસ્રં પુનર્ભવેત્ ।
એવં ષટ્કોણમાદૌ સ્વદીર્ઘાઙ્ગૈરેષ સંયુતઃ ॥ ૩૪॥

દ્વિતીયં વાસુદેવાદ્યૈરાગ્નેયાદિષુ સંયુતઃ ।
તૃતીયં વાયુસૂનું ચ સુગ્રીવં ભરતં તથા ॥ ૩૫॥

બિભીષણં લક્ષ્મણં ચ અઙ્ગદં ચારિમર્દનમ્ ।
જામ્બવન્તં ચ તૈર્યુક્તસ્તતો ધૃષ્ટિર્જયન્તકઃ ॥ ૩૬॥

વિજયશ્ચ સુરાષ્ટ્રશ્ચ રાષ્ટ્રવર્ધન એવ ચ ।
અશોકો ધર્મપાલશ્ચ સુમન્ત્રશ્ચૈભિરાવૃતઃ ॥ ૩૭॥

તતઃ સહસ્રદૃગ્વહ્નિર્ધર્મજ્ઞો વરુણોઽનિલઃ ।
ઇન્દ્વીશધાત્રનન્તાશ્ચ દશભિશ્ચૈભિરાવૃતઃ ॥ ૩૮॥

બહિસ્તદાયુધૈઃ પૂજ્યો નીલાદિભિરલઙ્કૃતઃ ।
વસિષ્ઠવામદેવાદિમુનિભિઃ સમુપાસિતઃ ॥ ૩૯॥

એવમુદ્દેશતઃ પ્રોક્તં નિર્દેશસ્તસ્ય ચાધુના ।
ત્રિરેખાપુટમાલિખ્ય મધ્યે તારદ્વયં લિખેત્ ॥ ૪૦॥

તન્મધ્યે બીજમાલિખ્ય તદધઃ સાધ્યમાલિખેત્ ।
દ્વિતીયાન્તં ચ તસ્યોર્ધ્વં ષષ્ઠ્યન્તં સાધકં તથા ॥ ૪૧॥

કુરુ દ્વયં ચ તત્પાર્શ્વે લિખેદ્બીજાન્તરે રમામ્ ।

તત્સર્વં પ્રણવાભ્યાં ચ વેષ્ટયેચ્છુદ્ધબુદ્ધિમાન્ ॥ ૪૨॥

દીર્ઘભાજિ ષડસ્રે તુ લિખેદ્બીજં હૃદાદિભિઃ ।
કોણપાર્શ્વે રમામાયે તદગ્રેઽનઙ્ગમાલિખેત્ ॥ ૪૩॥

ક્રોધં કોણાગ્રાન્તરેષુ લિખ્ય મન્ત્ર્યભિતો ગિરમ્ ।
વૃત્તત્રયં સાષ્ટપત્રં સરોજે વિલિખેત્સ્વરાન્ ॥ ૪૪॥

કેસરે ચાષ્ટપત્રે ચ વર્ગાષ્ટકમથાલિખેત્ ।
તેષુ માલામનોર્વર્ણાન્વિલિખેદૂર્મિસંખ્યયા ॥ ૪૫॥

અન્તે પઞ્ચાક્ષરાણ્યેવં પુનરષ્ટદલં લિખેત્ ।
તેષુ નારાયણાષ્ટાર્ણાંલિખ્ય તત્કેસરે રમામ્ ॥ ૪૬॥

તદ્બહિર્દ્વાદશદલં વિલિખેદ્વાદશાક્ષરમ્ ।
અથોં નમો ભગવતે વાસુદેવાય ઇત્યયમ્ ॥ ૪૭॥

આદિક્ષાન્તાન્કેસરેષુ વૃત્તાકારેણ સંલિખેત્ ।
તદ્બહિઃ ષોડશદલં લિખ્ય તત્કેસરે હૃયમ્ ॥ ૪૮॥

વર્માસ્ત્રનતિસંયુક્તં દલેષુ દ્વાદશાક્ષરમ્ ।
તત્સન્ધિષ્વિરજાદીનાં મન્ત્રાન્મન્ત્રી સમાલિખેત્ ॥ ૪૯॥

હ્રૂં સ્રં ભ્રં વ્રં લ્રૂં શ્રં જ્રં ચ લિખેત્સમ્યક્તતો બહિઃ ।
દ્વાત્રિંશારં મહાપદ્મં નાદબિન્દુસમાયુતમ્ ॥ ૫૦॥

વિલિખેન્મન્ત્રરાજાર્ણાંસ્તેષુ પત્રેષુ યત્નતઃ ।
ધ્યાયેદષ્ટવસૂનેકાદશરુદ્રાંશ્ચ તત્ર વૈ ॥ ૫૧॥

દ્વાદશેનાંશ્ચ ધાતારં વષટ્કારં ચ તદ્બહિઃ ।
ભૂગૃહં વજ્રશૂલાઢ્યં રેખાત્રયસમન્વિતમ્ ॥ ૫૨॥

દ્વારોપતં ચ રાશ્યાદિભૂષિતં ફણિસંયુતમ્ ।
અનન્તો વાસુકિશ્ચૈવ તક્ષઃ કર્કોટપદ્મકઃ ॥ ૫૩॥

મહાપદ્મશ્ચ શઙ્ખશ્ચ ગુલિકોઽષ્ટૌ પ્રકીર્તિતાઃ ।
એવં મણ્ડલમાલિખ્ય તસ્ય દિક્ષુ વિદિક્ષુ ચ ॥ ૫૪॥

નારસિંહં ચ વારાહં લિખેન્મન્ત્રદ્વયં તથા ।
કૂટો રેફાનુગ્રહેન્દુનાદશક્ત્યાદિભિર્યુતઃ ॥ ૫૫॥

યો નૃસિંહઃ સમાખ્યાતો ગ્રહમારણકર્મણિ ।
અન્ત્યાર્ઘીશવિયદ્બિન્દુનાદૈર્બીજં ચ સૌકરમ્ ॥ ૫૬॥

હુંકારં ચાત્ર રામસ્ય માલમન્ત્રોઽધુનેરિતઃ ।
તારો નતિશ્ચ નિદ્રાયાઃ સ્મૃતિર્મેદશ્ચ કામિકા ॥ ૫૭॥

રુદ્રેણ સંયુતા વહ્નિમેધામરવિભૂષિતા ।
દીર્ઘા ક્રૂરયુતા હ્લાદિન્યથો દીર્ઘસમાયુતા ॥ ૫૮॥

ક્ષુધા ક્રોધિન્યમોઘા ચ વિશ્વમપ્યથ મેધયા ।
યુક્તા દીર્ઘજ્વાલિની ચ સુસૂક્ષ્મા મૃત્યુરૂપિણી ॥ ૫૯॥

સપ્રતિષ્ઠા હ્લાદિની ત્વક્ક્ષ્વેલપ્રીતિશ્ચ સામરા ।
જ્યોતિસ્તીક્ષ્ણાગ્નિસંયુક્તા શ્વેતાનુસ્વારસંયુતા ॥ ૬૦॥

કામિકાપઞ્ચમૂલાન્તસ્તાન્તાન્તો થાન્ત ઇત્યથ ।
સ સાનન્તો દીર્ઘયુતો વાયુઃ સૂક્ષ્મયુતો વિષઃ ॥ ૬૧॥

કામિકા કામકા રુદ્રયુક્તાથોઽથ સ્થિરાતપા ।
તાપની દીર્ઘયુક્તા ભૂરનલોઽનન્તગોઽનિલઃ ॥ ૬૨॥

નારાયણાત્મકઃ કાલઃ પ્રાણાભો વિદ્યયા યુતઃ ।
પીતારાતિસ્તથા લાન્તો યોન્યા યુક્તસ્તતો નતિઃ ॥ ૬૩॥

સપ્તચત્વારિંશદ્વર્ણગુણાન્તઃસ્પૃઙ્મનુઃ સ્વયમ્ ।
રાજ્યાભિષિક્તસ્ય તસ્ય રામસ્યોક્તક્રમાલ્લિખેત્ ॥ ૬૪॥

ઇદં સર્વાત્મકં યન્ત્રં પ્રાગુક્તમૃષિસેવિતમ્ ।
સેવકાનાં મોક્ષકરમાયુરારોગ્યવર્ધનમ્ ॥ ૬૫॥

અપુત્રાણાં પુત્રદં ચ બહુના કિમનેન વૈ ।
પ્રાપ્નુવન્તિ ક્ષણાત્સમ્યગત્ર ધર્માદિકાનપિ ॥ ૬૬॥

ઇદં રહસ્યં પરમમીશ્વરેણાપિ દુર્ગમમ્ ।
ઇદં યન્ત્રં સમાખ્યાતં ન દેયં પ્રાકૃતે જને ॥ ૬૭॥ ઇતિ॥

ઇતિ તુરીયોપનિષત્ ॥

ૐ ભૂતાદિકં શોધયેદ્દ્વારપૂજાં
    કૃત્વા પદ્માદ્યાસનસ્થઃ પ્રસન્નઃ ।
અર્ચાવિધાવસ્ય પીઠાધરોર્ધ્વ-

પાર્શ્વાર્ચનં મધ્યપદ્માર્ચનં ચ ॥ ૧॥

કૃત્વા મૃદુશ્લક્ષ્ણસુતૂલિકાયાં
રત્નાસને દેશિકમર્ચયિત્વા ।
શક્તિં ચાધારાખ્યકાં કૂર્મનાગૌ
પૃથિવ્યબ્જ સ્વાસનાધઃ પ્રકલ્પ્ય ॥ ૨॥

વિઘ્નેશં દુર્ગાં ક્ષેત્રપાલં ચ વાણીં
બીજાદિકાંશ્ચાગ્નિદેશાદિકાંશ્ચ ।
પીઠસ્યાઙ્ઘ્રિષ્વેવ ધર્માદિકાંશ્ચ
નત્વા પૂર્વાદ્યાસુ દીક્ષ્વર્ચયેચ્ચ ॥ ૩॥

મધ્યે ક્રમાદર્કવિધ્વગ્નિતેજાં-
સ્યુપર્યુપર્યાદિમૈરર્ચિતાનિ ।
રજઃ સત્વં તમ એતાન્ વૃત્ત-
ત્રયં બીજાઢ્યં ક્રમાદ્ભાવયેચ્ચ ॥ ૪॥

આશાવ્યાશાસ્વપ્યથાત્માનમન્ત-
રાત્માનં વા પરમાત્માનમન્તઃ ।
જ્ઞાનાત્માનં ચાર્ચયેત્તસ્ય દિક્ષુ
માયાવિદ્યે યે કલાપારતત્ત્વે ॥ ૫॥

સમ્પૂજયેદ્વિમલાદીશ્ચ શક્તી-
રભ્યર્ચયેદ્દેવમવાહયેચ્ચ ।
અઙ્ગવ્યૂહાનિલજાદ્યૈશ્ચ પૂજ્ય
ધૃષ્ટ્યાદિકૈર્લોકપાલૈસ્તદસ્ત્રૈઃ ॥ ૬॥

વસિષ્ઠાદ્યૈર્મુનિભિર્નીલમુખ્યૈ-
રારાધયેદ્રાઘવં ચન્દનાદ્યૈઃ ।
મુખ્યોપહારૈર્વિવિધૈશ્ચ પૂજ્યૈ-
સ્તસ્મૈ જપાદીંશ્ચ સમ્યક્પ્રકલ્પ્ય ॥ ૭॥

એવંભૂતં જગદાધારભૂતં
રામં વન્દે સચ્ચિદાનન્દરૂપમ્ ।
ગદારિશઙ્ખાબ્જધરં ભવારિં
સ યો ધ્યાયેન્મોક્ષમાપ્નોતિ સર્વઃ ॥ ૮॥

વિશ્વવ્યાપી રાઘવો યસ્તદાની-
    મન્તર્દધે શઙ્ખચક્રે ગદાબ્જે ।
ધૃત્વા રમાસહિતઃ સાનુજશ્ચ
    સપત્તનઃ સાનુગઃ સર્વલોકી ॥ ૯॥

તદ્ભક્તા યે લબ્ધકામાંશ્ચ ભુક્ત્વા
    તથા પદં પરમં યાન્તિ તે ચ ।
ઇમા ઋચઃ સર્વકામાર્થદાશ્ચ
    યે તે પઠન્ત્યમલા યાન્તિ મોક્ષમ્ ॥ ૧૦॥

ઇતિ પઞ્ચમોઽપનિષત્ ॥

ચિન્મયેઽસ્મિંસ્ત્રયોદશ । સ્વભૂર્જ્યોતિસ્તિસ્રઃ ।
સીતારામાવેકા । જીવવાચી ષટ્ષષ્ટિઃ ।
ભૂતાદિકમેકાદશ । પઞ્ચખણ્ડેષુ ત્રિનવતિઃ ।
ઇતિ શ્રીરામપૂર્વતાપિન્યુપનિષત્સમાપ્તા ॥

રામોત્તરતાપિન્યુપનિષત્

ૐ બૃહસ્પતિરુવાચ યાજ્ઞવલ્ક્યમ્ । યદનુ કુરુક્ષેત્રં
દેવાનાં દેવયજનં સર્વેષાં ભૂતાનાં
બ્રહ્મસદનમવિમુક્તં વૈ કુરુક્ષેત્રં દેવાનાં દેવયજનં
સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ । તસ્માદ્યત્ર ક્વચન
ગચ્છતિ તદેવ મન્યેતેતીદં વૈ કુરુક્ષેત્રં દેવાનાં
દેવયજનં સર્વેષાં ભૂતાનાં બ્રહ્મસદનમ્ ।
અત્ર હિ જન્તોઃ પ્રાણેષૂત્ક્રમમાણેષુ રુદ્રસ્તારકં
બ્રહ્મ વ્યાચષ્ટે યેનાસાવમૃતીભૂત્વા મોક્ષીભવતિ ।
તસ્માદવિમુક્તમેવ નિષેવેત । અવિમુક્તં ન વિમુઞ્ચેત્ ।
એવમેવૈતદ્યાજ્ઞવલ્ક્ય ॥ ૧॥

અથ હૈનં ભારદ્વાજઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં કિં
તારકં કિં તારયતીતિ । સ હોવાચ યાજ્ઞવલ્ક્યસ્તારકં
દીર્ઘાનલં બિન્દુપૂર્વકં દીર્ઘાનલં પુનર્માયાં
નમશ્ચન્દ્રાય નમો ભદ્રાય નમ ઇત્યેતદ્બ્રહ્માત્મિકાઃ
સચ્ચિદાનન્દાખ્યા ઇત્યુપાસિતવ્યમ્ । અકારઃ પ્રથમાક્ષરો
ભવતિ । ઉકારોદ્વિતીયાક્ષરો ભવતિ । મકારસ્તૃતીયાક્ષરો

ભવતિ । અર્ધમાત્રશ્ચતુર્થાક્ષરો ભવતિ । બિન્દુઃ પઞ્ચમાક્ષરો
ભવતિ । નાદઃ ષષ્ઠાક્ષરો ભવતિ । તારકત્વાત્તારકો ભવતિ ।
તદેવ તારકં બ્રહ્મ ત્વં વિદ્ધિ । તદેવોપાસિતવ્યમિતિ જ્ઞેયમ્ । ગર્ભજન્મજરામરણસંસારમહદ્ભયાત્સંતારયતીતિ
।
તસ્માદુચ્યતે ષડક્ષરં તારકમિતિ । । ય એતત્તારકં બ્રહ્મ
બ્રાહ્મણો નિત્યમધીતે । સ પાપ્માનં તરતિ । સ મૃત્યું તરતિ ।
સ બ્રહ્મહત્યાં તરતિ । સ ભ્રૂણહત્યાં તરતિ। સ સંસારં તરતિ ।
સ સર્વં તરતિ । સોઽવિમુક્તમાશ્રિતો ભવતિ । સ મહાન્ભવતિ ।
સોઽમૃતત્વં ચ ગચ્છતિ ॥ ૨॥

અત્રૈતે શ્લોકા ભવન્તિ ।
અકારક્ષરસંભૂતઃ સૌમિત્રિર્વિશ્વભાવનઃ ।
ઉકારાક્ષરસંભૂતઃ શત્રુઘ્નસ્તૈજસાત્મકઃ ॥ ૧॥

પ્રાજ્ઞાત્મકસ્તુ ભરતો મકારાક્ષરસંભવઃ ।
અર્ધમાત્રાત્મકો રામો બ્રહ્માનન્દૈકવિગ્રહઃ ॥ ૨॥

શ્રીરામસાંનિધ્યવશાજ્જગદાધારકારિણી ।
ઉત્પત્તિસ્થિતિસંહારકારિણી સર્વદેહિનામ્ ॥ ૩॥

સા સીતા ભવતિ જ્ઞેયા મૂલપ્રકૃતિસંજ્ઞિતા ।
પ્રણવત્વાત્પ્રકૃતિરિતિ વદન્તિ બ્રહ્મવાદિનઃ ॥ ૪॥ ઇતિ॥

ઓમિત્યેતદક્ષરમિદં સર્વં તસ્યોપવ્યાખ્યાનં
ભૂતં ભવ્યં ભવિષ્યદિતિ સર્વમોઙ્કાર એવ ।
યચ્ચાન્યત્ત્રિકાલાતીતં તદપ્યોઙ્કાર એવ । સર્વં
હ્યેતદ્બ્રહ્મ । અયમાત્મા બ્રહ્મ સોઽયમાત્મા
ચતુષ્પાજ્જાગરિતસ્થાનો બહિઃપ્રજ્ઞઃ સપ્તાઙ્ગ
એકોનવિંશતિમુખઃ સ્થૂલભુગ્વૈશ્વાનરઃ
પ્રથમઃ પાદઃ ॥ સ્વપ્નસ્થાનોઽન્તઃપ્રજ્ઞઃ
સપ્તાઙ્ગ એકોનવિંશતિમુખઃ પ્રવિવિક્તભુક્ તૈજસો
દ્વિતીયઃ પાદઃ । યત્ર સુપ્તો ન કંચન કામં
કામયતે ન કંચન સ્વપ્નં પશ્યતિ તત્સુષુપ્તમ્ ।
સુષુપ્તસ્થાન એકીભૂતઃ પ્રજ્ઞાનઘનએવાનન્દમયો
હ્યાનન્દભુક્ ચેતોમુખઃ પ્રાજ્ઞસ્તૃતીયઃ પાદઃ ।

એષ સર્વેશ્વર એષ સર્વજ્ઞ એષોઽન્તર્યામ્યેષ
યોનિઃ સર્વસ્ય પ્રભવાપ્યયૌ હિ ભૂતાનામ્ ।
નાન્તઃપ્રજ્ઞં ન બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં
ન પ્રજ્ઞં નાપ્રજ્ઞં ન પ્રજ્ઞાનઘનમદૃશ્ય-
મવ્યવહાર્યમગ્રાહ્યમલક્ષણમચિન્ત્યમવ્યપદેશ્ય-
મેકાત્મપ્રત્યયસારં પ્રપઞ્ચોપશમં શાન્તં
શિવમદ્વૈતં ચતુર્થં મન્યન્તે । સ આત્મા સ વિજ્ઞેયઃ
સદોજ્જ્વલોઽવિદ્યાતત્કાર્યહીનઃ સ્વાત્મબન્ધહરઃ સર્વદા
દ્વૈતરહિત આનન્દરૂપઃ સર્વાધિષ્ઠાનસન્માત્રો
નિરસ્તાવિદ્યાતમોમોહોઽહમેવેતિ સંભાવ્યાહમોંત-
ત્સદ્યત્પરંબ્રહ્મ રામચન્દ્રશ્ચિદાત્મકઃ ।
સોઽહમોન્તદ્રામભદ્રપરંજ્યોતીરસોઽહમોમિત્યા-
ત્માનમાદાય મનસા બ્રહ્મણૈકીકુર્યાત્ ॥

સદા રામોઽહમસ્મીતિ તત્ત્વતઃ પ્રવદન્તિ યે ।
ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ॥ ઇત્યુપનિષત્ ॥

ય એવં વેદ સ મુક્તો ભવતીતિ યાજ્ઞવલ્ક્યઃ ॥

અથ હૈનમત્રિઃ પપ્રચ્છ યાજ્ઞવલ્ક્યં ય
એષોઽનન્તોઽવ્યક્તપરિપૂર્ણાનન્દૈકચિદાત્મા
તં કથમહં વિજાનીયામિતિ । સ હોવાચ યાજ્ઞવલ્ક્યઃ ।
સોઽવિમુક્ત ઉપાસ્યોઽયમ્ । એષોઽનન્તોઽવ્યક્ત આત્મા
સોઽવિમુક્તે પ્રતિષ્ઠિત ઇતિ । સોઽવિમુક્તઃ કસ્મિન્પ્રતિષ્ઠિત ઇતિ ।
વરણાયાં નાસ્યાં ચ મધ્યે પ્રતિષ્ઠિત ઇતિ ॥

કા વૈ વરણા કા ચ નાસીતિ । જન્માન્તરકૃતાન્સર્વા-
ન્દોષન્વારયતીતિ તેન વરણા ભવતીતિ ।
સર્વાનિન્દ્રિયકૃતાન્પાપાન્નાશયતીતિ તેન નાસી ભવતીતિ ।
કતમચ્ચાસ્ય સ્થાનં ભવતીતિ । ભ્રુવોર્ઘ્રાણસ્ય ચ
યઃ સન્ધિઃ સ એષ દ્યૌર્લોકસ્ય પરસ્ય ચ સન્ધિર્ભવતીતિ ।
એતદ્વૈ સન્ધિં સન્ધ્યાં બ્રહ્મવિદ ઉપાસત ઇતિ ॥

સોઽવિમુક્ત ઉપાસ્ય ઇતિ । સોઽવિમુક્તં જ્ઞાનમાચષ્ટે યો
વા એતદેવં વેદ ॥ અથ તં પ્રત્યુવાચ ।

શ્રીરામસ્ય મનું કાશ્યાં જજાપ વૃષભધ્વજઃ ।
મન્વન્તરસહસ્રૈસ્તુ જપહોમાર્ચનાદિભિઃ ॥૧॥

તતઃ પ્રસન્નો ભગવાઞ્છ્રીરામઃ પ્રાહ શંકરમ્ ।
વૃણીશ્વ યદભીષ્ટં તદ્દાસ્યામિ પરમેશ્વર ॥ ૨॥ ઇતિ ॥

અથ સચ્ચિદાનન્દાત્માનં શ્રીરામમીશ્વરઃ પપ્રચ્છ ।
મણિકર્ણ્યાં મમ ક્ષેત્રે ગઙ્ગાયાં વા તટે પુનઃ ।
મ્રિયેત દેહી તજ્જન્તોર્મુક્તિર્નાઽતો વરાન્તરમ્ ॥ ૩॥ ઇતિ ॥

અથ સ હોવાચ શ્રીરામઃ ॥

ક્ષેત્રેઽસ્મિંસ્તવ દેવેશ યત્ર કુત્રાપિ વા મૃતાઃ ।
કૃમિકીટાદયોઽપ્યાશુ મુક્તાઃ સન્તુ ન ચાન્યથા ॥ ૪॥

અવિમુક્તે તવ ક્ષેત્રે સર્વેષાં મુક્તિસિદ્ધયે ।
અહં સંનિહિતસ્તત્ર પાષાણપ્રતિમાદિષુ ॥ ૫॥

ક્ષેત્રેઽસ્મિન્યોઽર્ચયેદ્ભક્ત્યા મન્ત્રેણાનેન માં શિવ ।
બ્રહ્મહત્યાદિપાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ॥ ૬॥

ત્વત્તો વા બ્રહ્મણો વાપિ યે લભન્તે ષડક્ષરમ્ ।
જીવન્તો મન્ત્રસિદ્ધાઃ સ્યુર્મુક્તા માં પ્રાપ્નુવન્તિ તે ॥ ૭॥

મુમૂર્ષોર્દક્ષિણે કર્ણે યસ્ય કસ્યાપિ વા સ્વયમ્ ।
ઉપદેક્ષ્યસિ મન્મન્ત્રં સ મુક્તો ભવિતા શિવ ॥ ૮॥

ઇતિ શ્રીરામચન્દ્રેણોક્તમ્ ॥ અથ હૈનં ભારદ્વાજો
યાજ્ઞવલ્ક્યમુવાચાથ કૈર્મન્ત્રૈઃ સ્તુતઃ શ્રીરામચન્દ્રઃ
પ્રીતો ભવતિ । સ્વાત્માનં દર્શયતિ તાન્નો બ્રૂહિ ભગવન્નિતિ ।
સ હોવાચ યાજ્ઞવલ્ક્યઃ ॥ પૂર્વં સત્યલોકે શ્રીરામચન્દ્રેણૈવં
શિક્ષિતો બ્રહ્મા પુનરેતયા ગાથયા નમસ્કરોતિ ॥

વિશ્વરૂપધરં વિષ્ણું નારાયણમનામયમ્ ।
પૂર્ણાનન્દૈકવિજ્ઞાનં પરં બ્રહ્મસ્વરૂપિણમ્ ॥

મનસા સંસ્મરન્બ્રહ્મ તુષ્ટાવ પરમેશ્વરમ્ ।
ૐ યો હ વૈ શ્રીરામચન્દ્રઃ સ ભગવાનદ્વૈતપરમાનન્દ
આત્મા યત્પરં બ્રહ્મ ભૂર્ભુવઃ સુવસ્તસ્મૈ વૈ નમો નમઃ ॥ ૧॥

યથા પ્રથમમન્ત્રોક્તાવાદ્યન્તૌ તથા સર્વમન્ત્રેષુ જ્ઞાતવ્યૌ ॥

યશ્ચાખણ્ડૈકરસાત્મા ॥ ૨॥ યચ્ચ બ્રહ્માનન્દામૃતમ્ ॥ ૩॥

યત્તારકં બ્રહ્મ ॥ ૪॥ યો બ્રહ્મા વિષ્ણુર્મહેશ્વરો યઃ સર્વદેવાત્મા ॥ ૫॥

યે સર્વે વેદાઃ સાઙ્ગાઃ સશાખાઃ સેતિહાસપુરાણાઃ ॥ ૬॥

યો જીવાન્તરાત્મા ॥ ૭॥ યઃ સર્વભૂતાન્તરાત્મા ॥ ૮॥

યે દેવાસુરમનુષ્યાદિભાવાઃ ॥ ૯॥ યે મત્સ્યકૂર્માદ્યવતારાઃ ॥ ૧૦॥

યોઽન્તઃકરણચતુષ્ટયાત્મા ॥ ૧૧॥ યશ્ચ પ્રાણઃ ॥ ૧૨॥

યશ્ચ યમઃ ॥ ૧૩॥ યશ્ચાન્તકઃ ॥ ૧૪॥ યશ્ચ મૃત્યુઃ ॥ ૧૫॥

યચ્ચામૃતમ્ ॥ ૧૬॥ યાનિ ચ પઞ્ચમહાભૂતાનિ ॥ ૧૭॥

યઃ સ્થાવરજઙ્ગમાત્મા ॥ ૧૮॥ યે પઞ્ચાગ્નયઃ ॥ ૧૯॥

યાઃ સપ્ત મહાવ્યાહૃતયઃ ॥ ૨૦॥ યા વિદ્યા ॥ ૨૧॥

યા સરસ્વતી ॥ ૨૨॥ યા લક્ષ્મીઃ ॥ ૨૩॥ યા ગૌરી ॥ ૨૪॥

યા જાનકી ॥ ૨૫॥ યચ્ચ ત્રૈલોક્યમ્ ॥ ૨૬॥ યઃ સૂર્યઃ ॥ ૨૭॥

યઃ સોમઃ ॥ ૨૮॥ યાનિ ચ નક્ષત્રાણિ ॥ ૨૯॥ યે ચ નવ ગ્રહાઃ ॥ ૩૦॥

યે ચાષ્ટૌ લોકપાલાઃ ॥ ૩૧॥ યે ચાષ્ટૌ વસવઃ ॥ ૩૨॥

યે ચૈકાદશ રુદ્રાઃ ॥ ૩૩॥ યે ચ દ્વાદશાદિત્યાઃ ॥ ૩૪॥

યચ્ચ ભૂતં ભવ્યં ભવિષ્યત્ ॥ ૩૫॥

યદ્બ્રહ્માણ્ડસ્ય બહિર્વ્યાપ્તમ્ ॥ ૩૬॥ યો હિરણ્યગર્ભઃ ॥ ૩૭॥

યા પ્રકૃતિઃ ॥ ૩૮॥ યશ્ચોઙ્કારઃ ॥ ૩૯॥

યાશ્ચતસ્રોઽર્ધમાત્રાઃ ॥ ૪૦॥ યઃ પરમપુરુષઃ ॥ ૪૧॥

યશ્ચ મહેશ્વરઃ ॥ ૪૨॥ યશ્ચ મહાદેવઃ ॥ ૪૩॥

ય ૐ નમો ભગવતે વાસુદેવાય ॥ ૪૪॥ યો મહાવિષ્ણુઃ ॥ ૪૫॥

યઃ પરમાત્મા ॥ ૪૬॥ યો વિજ્ઞાનાત્મા ॥ ૪૭॥

ૐ યો હ વૈ શ્રીરામચન્દ્રઃ સ ભગવાનદ્વૈતપરમાનન્દ આત્મા ।
યઃ સચ્ચિદાનન્દાદ્વૈતૈકચિદાત્મા ભૂર્ભુવઃ સુવસ્તસ્મૈ

વૈ નમો નમઃ ॥ ઇતિ તાન્બ્રહ્માબ્રવીત્ । સપ્તચત્વારિંશન્મન્ત્રૈર્નિત્યં
દેવં સ્તુવધ્વમ્ । તતો દેવઃ પ્રીતો ભવતિ । સ્વાત્માનં દર્શયતિ ।
તસ્માદ્ય એતૈર્મન્ત્રૈર્નિત્યં દેવં સ્તૌતિ સ દેવં પશ્યતિ ।
સોઽમૃતત્વં ગચ્છતીતિ મહોપનિષત્ ॥ ૫॥

અથ હૈનં ભારદ્વાજો યાજ્ઞવલ્ક્યમુપસમેત્યોવાચ
શ્રીરામમન્ત્રરાજસ્ય માહાત્મ્યમનુબ્રૂહીતિ । સ હોવાચ યાજ્ઞવલ્ક્યઃ ।
સ્વપ્રકાશઃ પરંજ્યોતિઃ સ્વાનુભૂત્યૈકચિન્મયઃ ।
તદેવ રામચન્દ્રસ્ય મનોરાદ્યક્ષરઃ સ્મૃતઃ ॥ ૧॥

અખણ્ડૈકરસાનન્દસ્તારકબ્રહ્મવાચકઃ ।
રામાયેતિ સુવિજ્ઞેયઃ સત્યાનન્દચિદાત્મકઃ ॥ ૨॥

નમઃપદં સુવિજ્ઞેયં પૂર્ણાનન્દૈકકારણમ્ ।
સદા નમન્તિ હૃદયે સર્વે દેવા મુમુક્ષવઃ ॥ ૩॥ ઇતિ ॥

ય એવં મન્ત્રરાજં શ્રીરામચન્દ્રષડક્ષરં નિત્યમધીતે ।
સોઽગ્નિપૂતો ભવતિ । સ વાયુપૂતો ભવતિ । સ આદિત્યપૂતો ભવતિ ।
સ સોમપૂતો ભવતિ । સ બ્રહ્મપૂતો ભવતિ । સ વિષ્ણુપૂતો ભવતિ ।
સ રુદ્રપૂતો ભવતિ । સર્વૈર્દેવૈર્જ્ઞાતો ભવતિ । સર્વક્રતુભિરિષ્ટવાન્ભવતિ ।
તેનેતિહાસપુરાણાનાં રુદ્રાણાં શતસહસ્રાણિ જપ્તાનિ ફલાનિ ભવન્તિ ।
શ્રીરામચન્દ્રમનુસ્મરણેન ગાયત્ર્યઃ શતસહસ્રાણિ જપ્તાનિ ફલાનિ
ભવન્તિ । પ્રણવાનામયુતકોટિજપા ભવન્તિ । દશ પૂર્વાન્દશોત્તરાન્પુનાતિ ।
સ પઙ્ક્તિપાવનો ભવતિ । સ મહાન્ભવતિ । સોઽમૃતત્વં ચ ગચ્છતિ ॥

અત્રૈતે શ્લોકા ભવન્તિ ।
ગાણપત્યેષુ શૈવેષુ શાક્તસૌરેષ્વભીષ્ટદઃ ।
વૈષ્ણવેષ્વપિ સર્વેષુ રામમન્ત્રઃ ફલાધિકઃ ॥ ૪॥

ગાણપત્યાદિ મન્ત્રેષુ કોટિકોટિગુણાધિકઃ ।
મન્ત્રસ્તેષ્વપ્યનાયાસફલદોઽયં ષડક્ષરઃ ॥ ૫॥

ષડક્ષરોઽયં મન્ત્રઃ સ્યાત્સર્વાઘૌઘનિવારણઃ ।
મન્ત્રરાજ ઇતિ પ્રોક્તઃ સર્વેષામુત્તમોત્તમઃ ॥ ૬॥

કૃતં દિને યદ્દુરિતં પક્ષમાસર્તુવર્ષજમ્ ।
સર્વં દહતિ નિઃશેષં તૂલરાશિમિવાનલઃ ॥ ૭॥

બ્રહ્મહત્યાસહસ્રાણિ જ્ઞાનાજ્ઞાનકૃતાનિ ચ ।
સ્વર્ણસ્તેયસુરાપાનગુરુતલ્પાયુતાનિ ચ ॥ ૮॥

કોટિકોટિસહસ્રાણિ ઉપપાતકજાન્યપિ ।
સર્વાણ્યપિ પ્રણશ્યન્તિ રામમન્ત્રાનુકીર્તનાત્ ॥ ૯॥

ભૂતપ્રેતપિશાચાદ્યાઃ કૂષ્માણ્ડબ્રહ્મરાક્ષસાઃ ।
દૂરાદેવ પ્રધાવન્તિ રામમન્ત્રપ્રભાવતઃ ॥ ૧૦॥

ઐહલૌકિકમૈશ્વર્યં સ્વર્ગાદ્યં પારલૌકિકમ્ ।
કૈવલ્યં ભગવત્ત્વં ચ મન્ત્રોઽયં સાધયિષ્યતિ ॥ ૧૧॥

ગ્રામ્યારણ્યપશુઘ્નત્વં સંચિતં દુરુતં ચ યત્ ।
મદ્યપાનેન યત્પાપં તદપ્યાશુ વિનાશયેત્ ॥ ૧૨॥

અભક્ષ્યભખક્ષણોત્પન્નં મિથ્યાજ્ઞાનસમુદ્ભવમ્ ।
સર્વં વિલીયતે રામમન્ત્રસ્યાસ્યૈવ કીર્તનાત્ ॥ ૧૩॥

શ્રોત્રિયસ્વર્ણહરણાદ્યચ્ચ પાપમુપસ્થિતમ્ ।
રત્નાદેશ્ચાપહારેણ તદપ્યાશુ વિનાશયેત્ ॥ ૧૪॥

બ્રાહ્મણં ક્ષત્રિયં વૈશ્યં શૂદ્રં હત્વા ચ કિલ્બિષમ્ ।
સંચિનોતિ નરો મોહાદ્યદ્યત્તદપિ નાશયેત્ ॥ ૧૫॥

ગત્વાપિ માતરં મોહાદગમ્યાશ્ચૈવ યોષિતઃ ।
ઉપાસ્યાનેન મન્ત્રેણ રામસ્તદપિ નાશયેત્ ॥ ૧૬॥

મહાપાતકપાપિષ્ઠસઙ્ગત્યા સંચિતં ચ યત્ ।
નાશયેત્તત્કથાલાપશયનાસનભોજનૈઃ ॥ ૧૭॥

પિતૃમાતૃવધોત્પન્નં બુદ્ધિપૂર્વમઘં ચ યત્ ।
તદનુષ્ઠાનમાત્રેણસર્વમેતદ્વિલીયતે ॥ ૧૮॥

યત્પ્રયાગાદિતીર્થોક્તપ્રાયશ્ચિત્તશતૈરપિ ।
નૈવાપનોદ્યતે પાપં તદપ્યાશુ વિનાશયેત્ ॥ ૧૯॥

પુણ્યક્ષેત્રેષુ સર્વેષુ કુરુક્ષેત્રાદિષુ સ્વયમ્ ।
બુદ્ધિપૂર્વમઘં કૃત્વા તદપ્યાશુવિનાશયેત્ ॥ ૨૦॥

કૃચ્છ્રૈસ્તપ્તપરાકાદ્યૈર્નાનાચાન્દ્રાયણૈરપિ ।
પાપં ચ નાપનોદ્યં યત્તદપ્યાશુ વિનાશયેત્ ॥ ૨૧॥

આત્મતુલ્યસુવર્ણાદિદાનૈર્બહુવિધૈરપિ ।
કિંચિદપ્યપરિક્ષીણં તદપ્યાશુ વિનાશયેત્ ॥ ૨૨॥

અવસ્થાત્રિતયેષ્વેવબુદ્ધિપૂર્વમઘં ચ યત્ ।
તન્મન્ત્રસ્મરણેનૈવ નિઃશેષં પ્રવિલીયતે ॥ ૨૩॥

અવસ્થાત્રિતયેષ્વેવં મૂલબન્ધમન્ત્રં ચ યત્ ।
તત્તન્મન્ત્રોપદેશેન સર્વમેતત્પ્રણશ્યતિ ॥ ૨૪॥

આબ્રહ્મબીજદોષાશ્ચ નિયમાતિક્રમોદ્ભવાઃ ।
સ્ત્રીણાં ચ પુરુષાણાં ચ મન્ત્રેણાનેન નાશિતાઃ ॥ ૨૫॥

યેષુ યેષ્વપિ દેશેષુ રામભદ્ર ઉપાસ્યતે ।
દુર્ભિક્ષાદિભયં તેષુ ન ભવેત્તુ કદાચન ॥ ૨૬॥

શાન્તઃ પ્રસન્નવદનો હ્યક્રોધો ભક્તવત્સલઃ ।
અનેન સદૃશો મન્ત્રો જગત્સ્વપિ ન વિદ્યતે ॥ ૨૭॥

સમ્યગારાધિતો રામઃ પ્રસીદત્યેવ સત્વરમ્ ।
દદાત્યાયુષ્યમૈશ્વર્યમન્તે વિષ્ણુપદં ચ યત્ ॥ ૨૮॥

તદેતદૃચાભ્યુક્તમ્ ।
ઋચો અક્ષરે પરમે વ્યોમન્યસ્મિન્દેવા અધિ વિશ્વે નિષેદુઃ ।
યસ્તન્ન વેદ કિમૃચા કરિષ્યતિ ય ઇત્તદ્વિદુસ્ત ઇમે સમાસતે ।
તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ । તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્પરમં પદમ્ । ૐ સત્યમિત્યુપનિષત્ ॥ ૬॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ રામોત્તરતાપિન્યુપનિષત્સમાપ્તા ॥

ઇતિ રામતાપિન્યુપનિષત્સમાપ્તા॥

Encoded by Sunder Hattangadi

*shrIRamatapini Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*